# Shri Krishnakritam 4 Shiva Stotram

# શ્રીકૃષ્ણકૃતં ૪ શિવસ્તોત્રમ્

## Document Information

Text title : Shri Krishnakritam 4 Shiva Stotram

File name : kRRiShNakRRitaM4shivastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | anuparva | adhyAya 15/30-45||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# શ્રીકૃષ્ણકૃતં ૪ શિવસ્તોત્રમ્

નમોઽસ્તુ તે શાશ્વત સર્વયોને બ્રહ્માધિપં ત્વામૃષયો વદન્તિ ।
તપશ્ચ સત્ત્વં ચ રજસ્તમશ્ચ ત્વામેવ સત્યં ચ વદન્તિ સન્તઃ ॥ ૩૦॥

ત્વં વૈ બ્રહ્મા ચ રુદ્રશ્ચ વરુણોઽગ્નિર્મનુર્ભવઃ ।
ધાતા ત્વષ્ટા વિધાતા ચ ત્વં પ્રભુઃ સર્વતોમુખઃ ॥ ૩૧॥

ત્વત્તો જાતાનિ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ।
ત્વમાદિઃ સર્વભૂતાનાં સંહારશ્ચ ત્વમેવ હિ ॥ ૩૨॥

યે ચેન્દ્રિયાર્થાશ્ચ મનશ્ચ કૃત્સ્નં યે વાયવઃ સપ્ત તથૈવ ચાગ્નિઃ ।
યે વા દિવિસ્થા દેવતાશ્ચાપિ પુંસાં તસ્માત્પરં ત્વામૃષયો વદન્તિ ॥ ૩૩॥

વેદા યજ્ઞાશ્ચ સોમશ્ચ દક્ષિણા પાવકો હવિઃ ।
યજ્ઞોપગં ચ યત્કિઞ્ચિદ્ભગવાંસ્તદસંશયમ્ ॥ ૩૪॥

ઇષ્ટં દત્તમધીતં ચ વ્રતાનિ નિયમાશ્ચ યે ।
હ્રીઃ કીર્તિઃ શ્રીર્દ્યુતિસ્તુષ્ટિઃ સિદ્ધિશ્ચૈવ ત્વદર્પણા ॥ ૩૫॥

કામઃ ક્રોધો ભયં લોભો મદઃ સ્તમ્ભોઽથ મત્સરઃ ।
આધયો વ્યાધયશ્ચૈવ ભગવંસ્તનયાસ્તવ ॥ ૩૬॥

કૃતિર્વિકારઃ પ્રલયઃ પ્રધાનં પ્રભવોઽવ્યયઃ ।
મનસઃ પરમા યોનિઃ સ્વભાવશ્ચાપિ શાશ્વતઃ ॥ ૩૭॥

અવ્યક્તઃ પાવન વિભો સહસ્રાંશો હિરણ્મયઃ ॥ ૩૭॥

આદિર્ગુણાનાં સર્વેષાં ભવાન્વૈ જીવનાશ્રયઃ ।
મહાનાત્મા મતિર્બ્રહ્મા વિશ્વઃ શમ્ભુઃ સ્વયમ્ભુવઃ ॥ ૩૮॥

બુદ્ધિઃ પ્રજ્ઞોપલબ્ધિશ્ચ સંવિત્ખ્યાતિર્ધૃતિઃ સ્મૃતિઃ ।
પર્યાયવાચકૈઃ શબ્દૈર્મહાનાત્મા વિભાવ્યસે ॥ ૩૯॥

ત્વાં બુદ્ધ્વા બ્રાહ્મણો વિદ્વાન્ન પ્રમોહં નિગચ્છતિ ।

હૃદયં સર્વભૂતાનાં ક્ષેત્રજ્ઞસ્ત્વમૃષિષ્ટુતઃ ॥ ૪૦॥

સર્વતઃપાણિપાદસ્ત્વં સર્વતોઽક્ષિશિરોમુખઃ ।
સર્વતઃશ્રુતિમાઁલ્લોકે સર્વમાવૃત્ય તિષ્ઠસિ ॥ ૪૧॥

ફલં ત્વમસિ તિગ્માંશો નિમેષાદિષુ કર્મસુ ।
ત્વં વૈ પ્રભાર્ચિઃ પુરુષઃ સર્વસ્ય હૃદિ સંસ્થિતઃ ।
અણિમા લઘિમા પ્રાપ્તિરીશાનો જ્યોતિરવ્યયઃ ॥ ૪૨॥

ત્વયિ બુદ્ધિર્મતિર્લોકાઃ પ્રપન્નાઃ સંશ્રિતાશ્ચ યે ।
ધ્યાનિનો નિત્યયોગાશ્ચ સત્યસન્ધા જિતેન્દ્રિયાઃ ॥ ૪૩॥

યસ્ત્વાં ધ્રુવં વેદયતે ગુહાશયં પ્રભું પુરાણં પુરુષં વિશ્વરૂપમ્ ।
હિરણ્મયં બુદ્ધિમતાં પરાં ગતિં સ બુદ્ધિમાન્બુદ્ધિમતીત્ય તિષ્ઠતિ ॥ ૪૪॥

વિદિત્વા સપ્ત સૂક્ષ્માણિ ષડઙ્ગં ત્વાં ચ મૂર્તિતઃ ।
પ્રધાનવિધિયોગસ્થસ્ત્વામેવ વિશતે બુધઃ ॥ ૪૫॥

ઇતિ મહાભારતે અનુશાસનપર્વણિ ૧૫ અધ્યાયાન્તર્ગતં
શ્રીકૃષ્ણકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । અનુપર્વ । અધ્યાય ૧૫/૩૦-૪૫॥

mahAbhArata . anuparva . adhyAya 15/30-45..

Proofread by PSA Easwaran

*Shri Krishnakritam 4 Shiva Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*